पात्रं हि नापुण्यकृतो भवन्ति
मुक्ताफलस्याहिशिरोभवस्य ॥
विप्रासया रत्नधनं विधिज्ञैः
शुभे मुहूर्त्ते प्रयतैः प्रयत्नात् ।
रत्नाविधानं सुमहद्विधाय
चर्म्मोपरिस्थं क्रियते यदा तत् ।
तदा महादुन्दुभिमन्द्रघोषै-
र्विद्युल्लताविस्फुरितान्तरालैः ।
पयोधराक्रान्तिविलम्बलम्बि-
घनैर्घनैर्वा क्रियतेऽन्तरीक्षम् ॥
न तं भुजङ्गा न च यातुधाना
न व्याधयो नाप्युपसर्गदोषाः ।
हिंसन्ति यस्याहिशिरःप्रसूतं
मुक्ताफलं तिष्ठति पूज्यमानम् ॥
नाप्नोति मेघप्रभवं धरित्रीं
वियद्गतं तद्विबुधा हरन्ति ।
अर्च्चिःप्रभावाहृतदिग्विभाग-
मादित्यवद्दुःखविभाव्यबिम्बम् ॥
तेजस्तिरस्कृत्य हुताशनेन्दु-
नक्षत्रताराप्रभवं समग्रम् ।
दिवा यथा दीप्तिकरं तथैव
तमोऽवगाढ़ास्वपि तत्त्रियामासु ।
विचित्ररत्नद्युतिसारतोय-
चतुःसमुद्राभरणोपपन्ना ।
स्यात्ता न वा स्यादिति निश्चयो मे
मूल्यं मही तस्य सुवर्णपूर्णा ॥
हीनोऽपि यस्तल्लभते कदाचिद्-
विपाकयोगाज्जनतः शुभस्य ।
सपत्नहीनां स महीं समग्रां
भुनक्ति तत्तिष्ठति यावदेव ॥
न केवलं तत्स्वभुजानुगस्य
भाग्यैः प्रजानामपि तस्य जन्म ।
यद्योजनानां परितः सहस्रं
सर्व्वाननर्थान् विमुखीकरोति ॥
नक्षत्रमालेव दिवो विशीर्णा
दन्तावली तस्य महासुरस्य ।
विचित्रवर्णेषु विशुद्धवर्णा
पयःसु पत्युः पयसां पपात ॥
सम्पूर्णचन्द्रांशुकलापकान्ते-
र्मणिप्रवेकस्य महागुणस्य ।
तच्छुक्तिमत्सु स्थितमापगेश-
मासन् पुराण्यम्बुभृतानि यानि ॥
यस्मिन् प्रदेशेऽम्बुनिधौ पपात
सुचारु मुक्तामणिरत्नबीजम् ।
तस्मिन् पयस्तोयधरावकीर्णं
शुक्तौ स्थितं मौक्तिकतामवाप ॥
सैंहलिकपारलौकिकसौरा-
ष्ट्रिकताम्रपर्णपारसवाः ।
कौवेरपाण्ड्यहाटक-
हैमका इत्याकरास्त्वष्टौ ॥
गुरुद्भवं नातिनिकृष्टवर्णं
प्रमाणसंस्थानगुणप्रभाभिः ।
उत्पद्यते वर्द्धनपारसीक-
पातालकोकान्तरसिंहलेषु ।
चिन्त्या न तस्याकरजा विशेषा
रूपे प्रमाणे च यतेत विद्वान् ।
न च व्यवस्थास्ति गुणागुणेषु
सर्व्वत्र सर्व्वाकृतयो वसन्ति ॥
एकस्य शुक्तिप्रभवस्य मुक्ता-
फलस्य शाणेन समुन्मितस्य ।
मूल्यं सहस्राणि तु रूपकाणां
त्रिभिः शतैरभ्यधिकानि पञ्च ॥
यन्माषकार्द्धेन ततो विहीनं
तत्पञ्चभागत्रयहीनमूल्यम् ।
यन्माषकांस्त्रीन् बिभृयात् सहस्रे
द्वे तस्य मूल्यं परमं प्रदिष्टम् ॥
अर्द्धाधिकौ द्वौ वहतोऽस्य मूल्यं
त्रिभिः शतैरभ्यधिकं सहस्रम् ।
द्विमाषकोन्मापितगौरवस्य
शतानि चाष्टौ कथितानि मूल्यम् ॥
अर्द्धाधिकं माषकमुन्मितस्य
सपञ्चविंशत्त्रितयं शतानाम् ।
गुञ्जाश्च षड् धारयतः शते द्वे
मूल्यं परं तस्य वदन्ति तज्ज्ञाः ॥
अध्यर्द्धमुन्मापकृतं शतं स्यात्
मूल्यं गुणैस्तस्य समन्वितस्य ।
यदि शोड़शभिर्भवेदनूनं
धरणं तत्प्रवदन्ति दात्रिकाख्यम् ॥
अधिकं दशभिः शतञ्च मूल्यं
समवाप्नोत्यपि वाणिशस्य हस्तात् ।
द्विगुणैर्दशभिर्भवेदनूनं
धरणं तद्भवकं वदन्ति तज्ज्ञाः ॥
नवमप्रतिमाप्नुयात् स मूल्यं
यदि न स्याद्गुणसम्पदा विहीनम् ॥
त्रिंशता धरणं पूर्णं शिक्यं तस्येति कीर्त्यते ।
चत्वारिंशद्भवेत्तस्याः परं मूल्यं विनिश्चयः ।
चत्वारिंशद्भवेच्छिक्यो विंशं मूल्यं लभेत सा ॥
षष्टिर्निकरशीर्षं स्यात्तस्य मूल्यं चतुर्द्दश ।
अशीतिर्नवतिश्चैव कुप्येति परिकीर्त्तिता ।
एकादश स्यान्नव च तयोर्मूल्यमनुक्रमात् ॥
आदाय तत् सकलमेव ततोऽश्मभाण्डं
जम्बीरजातरसयोजनया विपक्वम् ।
हृष्टं ततो मृदुतनूकृतपिष्टमूलैः
कुर्य्यादुपेतमनुमौक्तिकमाशु विद्धम् ॥
स्निग्धमत्स्यपुटमध्यगतन्तु कृत्वा
पश्चात् पचेत्तदनु तच्च वितानपत्र्या ।
दुग्धे ततः पयसि तं विपचेत् सुधायां
पक्वं ततोऽपि पयसा शुचि चिक्कणेन ॥
शुद्धं ततो विमलवस्त्रनिघर्षणेन
स्यान्मौक्तिकं विपुलसद्गुणकान्तियुक्तम् ।
व्याडिर्जगाद जगतो हि महाप्रभाव-
सिद्धो विदग्धहिततत्परया दयालुः ॥
सितकाचसमं तारं हेमाशतयोजितम् ।
रसमध्ये प्रधार्य्येत मौक्तिकं देहभूषणम् ॥
एवं हि सिंहले देशे कुर्व्वन्ति कुशला जनाः ।
यस्मिन् कृत्रिमसन्देहः क्वचिद्भवति मौक्तिके ॥
उष्णे सलवणे स्नेहे निशां तद्वासयेज्जले ।
व्रीहिभिर्मर्द्दनीयं वा शुष्कवस्त्रोपवेष्टितम् ॥
यत्तु नायाति वैवर्ण्यं विज्ञेयं तदकृत्रिमम् ।
सितं प्रमाणवत् स्निग्धं गुरु स्वच्छं सुनिर्म्मलम् ।
तेजोऽधिकं सुवृत्तञ्च मौक्तिकं गुणवत् स्मृतम् ॥
प्रमाणवद्गौरवरश्मियुक्तं
सितं सुवृत्तं समसूक्ष्मवेधम् ।
अक्रेतुरप्यावहति प्रमोदं
यन्मौक्तिकं तद्गुणवत् प्रदिष्टम् ॥
एवं समस्तेन गुणोदयेन
यन्मौक्तिकं योगमुपागतं स्यात् ।
न तस्य भर्त्तारमनर्थजात
एकोऽपि कश्चित् समुपैति दोषः ॥"
इति गारुड़े ६८ अध्यायः ॥

मुक्तामुक्तः, त्रि, (मुक्तश्च अमुक्तश्चेति विशेषणयो-
र्द्वन्द्वः ।) भिन्नाभिन्नः । अस्य प्रयोगो अस्त्रे
शस्त्रे च प्रायो वर्त्तते । इति हलायुधः ॥

मुक्तालता, स्त्री, (मुक्ताभिर्लतेव ।) मुक्ताहारः ।
इति हेमचन्द्रः । ३ । ३२२ ॥

मुक्तावली, स्त्री, (मुक्तानां आवलयः) मुक्ता-
हारः । इत्यमरः । २।६।१०५ ॥ (मुक्तानामा-
वली ।) मौक्तिकश्रेणी च ॥ (तालविशेषः । यथा,
सङ्गीतदामोदरे ।
"लत्रयं सविरामान्तं गौ पुनः लत्रयं तथा ।
प्लुतौगः लघुगं गश्च यत्र मुक्तावली तु सा ॥")

मुक्तास्फोटः, पुं, (मुक्तानां स्फोटः विकाशोऽत्र ।)
शुक्तिः । इत्यमरः । १ । १० । २३ ॥

मुक्तास्फोटा, स्त्री, (मुक्तास्फोट + टाप् ।) शुक्तिः ।
इति राजनिर्घण्टः ॥

मुक्तिः, स्त्री, (मुच् + भावे क्तिन् ।) आत्यन्तिक-
दुःखनिवृत्तिः । इति नैयायिकाः ॥ नित्यसुखा-
वाप्तिः । इति वैदान्तिकाः । शरीरेन्द्रियाभ्यां
आत्मनो मुक्तत्वं मुक्तिः । इति भरतः । मोक्षः ।
तत्पर्य्यायः । कैवल्यम् २ निर्व्वाणम् ३ श्रेयः ४
निःश्रेयसम् ५ अमृतम् ६ मोक्षः ७ अपवर्गः ८ ।
इत्यमरः । १।५।६ ॥ अपुनर्भवः ९ शिवः १०
अक्षरम् ११ । इति जटाधरः ॥ सा पञ्चविधा ।
सार्ष्टिः १ सालोक्यम् २ सारूप्यम् ३ सायुज्यम् ४
निर्व्वाणम् ५ । यथा,—
"सार्ष्टिसारूप्यसालोक्यसामीप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥"
इति श्रीभागवतम् ॥
"मुक्तिस्तु द्विविधा साध्वि ! श्रुत्युक्ता सर्व्वसम्मता ।
निर्व्वाणपददात्री च हरिभक्तिप्रदा नृणाम् ॥
हरिभक्तिस्वरूपाञ्च मुक्तिं वाञ्छन्ति वैष्णवाः ।
अन्ये निर्व्वाणरूपाञ्च मुक्तिमिच्छन्ति साधवः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २९ अध्यायः ॥*॥
मुक्तिकरयोगो यथा,—
"वक्ष्ये साङ्गमहायोगं भुक्तिमुक्तिकरं परम् ।
सर्व्वपापप्रशमनं भक्तानुपठितं त्वया ॥